संस्कृत वार्ता:

दिनाङ्क : 04.04.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- चतुर्षु राज्येषु, एकस्मिन् केन्द्रशासितप्रदेशे च विधानसभा-निर्वाचनस्य प्रचारः तीव्रः अभवत्।
- उत्तरप्रदेशस्य आरक्षकैः आई. एस्. आई. आतंकि-समूहस्य लखनऊतः चत्वारः सन्दिग्धाः गृहीताः, ये रेल्-स्थानकै: सह महत्त्वपूर्णेषु स्थानेषु विस्फोटं कर्तुम् तत्परा: आसन्।
- भारतीयध्वजाङ्कितम् एलपीजी-इत्यनेन युक्तं "ग्रीन सानवी" जलयानं युद्ध ग्रस्तं क्षेत्रं होर्मुज-जलसंधि-क्षेत्रं सुरक्षितरूपेण तीर्त्वा स्वदेशं प्रत्यागच्छति।
- ईरानेन संयुक्त राज्य अमेरिका-देशस्य अष्ट चत्वारिंशत् होरायाः शान्ति-प्रस्तावं औपचारिकतया निराकृतम्।
- भारतीय-धनुष्क्रीडकः श्याम्-सुन्दर्-स्वामी बैंङ्काक-नगरे विश्व-धनुष्क्रीडायां पैरा-श्रृङ्खलायां पुरुषाणां कम्पाउण्ड्-व्यक्तिगत-स्पर्धायां कांस्यपदकं विजितवान्।

<u>निर्वाचन प्रचारः</u>

चतुर्षु राज्येषु, एकस्मिन् केन्द्रशासितप्रदेशे च विधानसभा-निर्वाचनस्य प्रचारः तीव्रः अभवत्। अप्रैल-मासस्य नवमे दिनाङ्के विधानसभानिर्वाचनात् प्राक् केरलम्-राज्ये उच्चतर निर्वाचन-प्रचारः दृश्यते। प्रमुख-राजनैतिक-दलानां प्रमुखाः राष्ट्रियनेतारः सम्पूर्णे राज्ये प्रमुखेषु निर्वाचनक्षेत्रेषु निर्वाचन-सभानां नेतृत्वं कुर्वन्ति। सोमवासरे नामाङ्कन प्रक्रियायाः समाप्तेः अनन्तरम्, प्रधानमन्त्री तथा भाजपेति दलस्य वरिष्ठः नेता नरेन्द्रमोदी चेन्नई-नगरे राज्य-भाजपा-दलस्य वरिष्ठनेतृभिः सह चर्चाम् अकरोत्।

प्रधानमन्त्री-केरलम

प्रधानमन्त्री तथा भाजपेति दलस्य वरिष्ठः नेता नरेन्द्रमोदी अवदत् यत् भारतीयानां, विशेषतः मध्यपूर्वस्य केरलम् राज्यस्य जनानां सुरक्षां तस्य सर्वकारस्य सर्वोच्चप्राथमिकता अस्ति। सः अद्य तिरुवल्ला--नगरे एन्. डी. ए. निर्वाचन-प्रचारस्य भागत्वेन जनसभां सम्बोधयन् आसीत्। श्रीमोदी अवदत् यत् गल्फ्-देशैः सह सर्वकारस्य दृढसम्बन्धाः एतेषु दुष्करसमये तत्र भारतीयानां रक्षणाय साहाय्यं कुर्वन्तः सन्ति। सः अग्रे अवदत् यत् केरलम् ऐतिहासिक-परिवर्तनस्य कृते सज्जम् अस्ति तथा च एन्. डी. ए. इत्यत्र जनानां अपरिमितः विश्वासः सम्पूर्णे राज्ये दृश्यते। महिला-सशक्तीकरणं एन्. डी. ए-दलस्य प्राधान्यम् अस्ति तथा च महिलाः तस्य नीतिभिः सर्वाधिकं लाभम् अवाप्नुवन् इत्यपि सः अवदत्।

श्रीमोदी, एल्. डी. एफ्. तथा यू. डी. एफ्. इत्येतयोः अपि निन्दाम् अकरोत्, यत् उभौ पक्षौ दीर्घकालं यावत् राज्यस्य अवहेलनं कृतवन्तः इति आरोपयन्, तस्य सर्वकारस्य अधीने केरलम्-राज्येन पूर्वकालस्य अपेक्षया पञ्चगुणितोप्यधिकानि धनानि प्राप्तानि इति उक्तवान्। तिरुवल्ला-सार्वजनिक-क्रीडाङ्गणे आयोजिते कार्यक्रमे एन्. डी. ए.-दलस्य प्रत्याशिनः वरिष्ठ-नेतारः च उपस्थिताः भवन्ति। अद्य सायङ्काले श्रीमोदी निर्वाचन-प्रचारस्य भागत्वेन तिरुवनंतपुरं-नगरे पथ-प्रदर्शने भागं ग्रहीष्यति।

राहुलगान्धी-केरल-भ्रमणम्

काङ्ग्रेस्-दलस्य वरिष्ठः नेता तथा लोकसभायाः विपक्षस्य नेता राहुलगान्धी वर्यः अद्य अलपुझायाम् उक्तवान् यत् यू डी एफ् केरलम् -राज्ये वास्तविक-परिवर्तनम् आनेतुं सज्जः अस्ति। सः एल्. डी. एफ्. तथा एन्. डी. ए. इत्येतयोः पक्षयोः निन्दाम् अकरोत्, तथा च विधानसभा-निर्वाचनानन्तरं शासकस्य एल्. डी. एफ्. इत्यस्य प्रासङ्गिकता नष्टा भविष्यति इति उक्तवान्। अद्य सः इडुक्की-एर्नाकुलम्-मण्डलयोः यू डी एफ्-निर्वाचन-सभाम् अपि सम्बोधितवान्।

उत्तरप्रदेश-आई.एस्.आई.

उत्तरप्रदेशस्य आरक्षकैः आई. एस्. आई. आतंकि-समूहस्य लखनऊतः चत्वारः सन्दिग्धाः गृहीताः, ये रेल्-स्थानकैः सह महत्त्वपूर्णेषु स्थानेषु विस्फोटं कर्तुम् तत्पराः आसन्। यू. पी. आरक्षकस्य भयोत्पादन-विरोधी-दलस्य अनुसारं, मेरठ-नगरस्य निवासिनः साकिब अथ डेविड्, अरबाबः, विकास् गहलोतः, लोकेशः च चत्वारः शङ्किताः, गौतमबुद्धनगरस्य निवासिनः ह्यः गृहीताः। रेल्-सङ्केतपेटिकासु, जनसम्मर्दस्थानेषु, गैस्-सिलिण्डर्-युक्तेषु वाहनेषु, प्रतिष्ठितेषु आयोजन स्थलेषु च विस्फोटं कृत्वा आतङ्कं जनयितुं समूहस्य योजना आसीत्, तेषां प्रथमं लक्ष्यम् लखनऊ-रेलस्थानकम् आसीत्। क्षौरकः साकिब् इत्येषः समूहस्य प्रमुखः आसीत्, तथा च सः टेलिग्राम्, इन्स्टाग्राम् इत्यादिभिः सामाजिकान्तर्जालीय-मञ्चानां माध्यमेन स्वस्य पाकिस्तानी-निर्वाहकैः सह सम्पर्के आसीत्।

एलपीजी

भारतीयध्वजाङ्कितम् एलपीजी-इत्यनेन युक्तं "ग्रीन सानवी" जलयानं युद्ध ग्रस्तं क्षेत्रं होर्मुज-जलसंधि-क्षेत्रं सुरक्षितरूपेण तीर्त्वा स्वदेशं प्रत्यागच्छति। प्रशासनिक सूत्रानुसारं पश्चिम-एशिया-संघर्षस्य मध्ये होर्मुज- जलसंधि-क्षेत्रं तीर्त्वा गच्छन् एषः सप्तमः भारतीय-एलपीजी इत्यनेन युक्तं वाहनम् अस्ति। पश्चिम-फारस-खाडी-प्रदेशे अधुना सप्तदशसु भारतीयध्वजाङ्कितेषु जलपोतेषु चतुःशताधिकाः भारतीय-नाविकाः आरूढाः सन्ति। अद्यावधौ खाडी-प्रदेशात् त्रिंशताधिकैकादशाधिकशत भारतीय-नाविकानां सुरक्षितं स्वदेश-प्रत्यागमनं सम्पन्नम् ।

ईरान-शान्ति–प्रस्ताव

ईरानेन संयुक्त राज्य अमेरिका-देशस्य अष्ट चत्वारिंशत् होरायाः शान्ति-प्रस्तावं औपचारिकतया निराकृतम्। पश्चिम-एशिया-प्रदेशे वर्धमानस्य संघर्षस्य मध्ये तेहरान-नगरस्य दृढं मनोभावं प्रकाशयन्त्या एषा अस्वीकृतिः क्षेत्रे अधिक-अस्थिरतायाः आशङ्कां वर्धयति। एषः प्रस्तावः

तृतीय-देशस्य माध्यमेन प्रेषितः आसीत्, परञ्च तेहरान-नगरम् विरामम् अस्वीकृत्य स्थलीय-स्तरे अभियानं तीव्रतरं कृतवान्। अस्य निराकरणस्य विषये संयुक्त राज्य अमेरिका-देशात् काचित् सार्वजनिक-टिप्पणी अधुना पर्यन्तं न प्राप्ता।

जयशङ्करः

विदेशमन्त्री डॉ. एस. जयशङ्करः अवदत् यत् वर्तमानस्थितिः केवलं परिस्थितिजन्या नास्ति, अपि तु संरचनात्मिकापि अस्ति, यतः विश्वव्यवस्थायां महत्त्वपूर्णानि परिवर्तनानि आनयति। आईआईएम रायपुरस्य पञ्चदशे दीक्षान्तसमारोहे सम्बोधयन् डॉ. जयशङ्करः अवदत् यत् राष्ट्राणां सापेक्षशक्तौ प्रभावे च परिवर्तनानि दृश्यन्ते। तेन उक्तं यत् समाजस्य काषाञ्चित् राजनैतिकव्यवस्थाः एतेषां परिवर्तितस्वरूपाणां अनुकूलनं कर्तुं काठिन्यम् अनुभवन्ति। मन्त्री एतस्मिन् विषये प्रतिपादितवान् यत् प्रौद्योगिकी, ऊर्जा, सैन्यक्षमताः, सम्पर्कः संसाधनानि च इत्येषु क्षेत्रेषु तीव्रप्रगत्या, द्रुतं प्रतिस्पर्धायुक्ते वैश्विकपर्यावरणे प्रत्याह्वानग्रहणस्य प्रवृत्तिः वर्धिता अस्ति। तेन उक्तं यत् विभिन्नक्षेत्राणाम् अधुना लाभः उपयुज्यते, केषुचित् सन्दर्भेषु तेषां शस्त्रीकरणमपि क्रियते।

निर्वाचनायोग-पश्चिबङ्गाल

निर्वाचन-आयोगेन पश्चिमबङ्गालराज्ये मतदातृणां सौलभ्यं साधयितुं षष्ठ्यधिकषट्शताधिकचतुःसहस्र सहायक-मतदातृकेन्द्राणां निर्माणम् अनुमोदितम्, यत्र मतदातृ सङ्ख्या द्वादश-शताधिका अभवत्। मतदातृणां सुलभतायै एकविंशत्यधिक त्रिशत-मतदातृ-केन्द्राणां स्थानान्तरणम् अपि आयोगेन अनुमोदितम्। पश्चिमबङ्गालराज्ये सहायक-मतदानकेन्द्रैः सह मतदानकेन्द्राणां कुलसङ्ख्या अधुना प्रायः सार्द्ध पञ्चाशीतिः अस्ति। निर्वाचन-आयोगेन अस्मिन् विषये राज्यस्य मुख्य-निर्वाचन-अधिकारिणां कृते पत्राणि लिखितानि।

उपराष्ट्रपति

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, शिक्षायाः परिवर्तनशीलशक्तिं, "विकसितभारतं" प्रति यात्रायां तस्य महत्त्वपूर्णां भूमिकां च प्रकाशितवान्। मोतिहारी-नगरस्य महात्मा-गान्धी-केन्द्रीय-विश्वविद्यालये तृतीय-दीक्षान्त-समारोहं सम्बोधयन्, सः छात्रान् देशम् सम्मुखीभूयमानानां समाह्वानानां निवारणार्थं स्वज्ञानस्य उपयोगाय आदिष्टवान्।

पैरा- धनुष्क्रीडा

भारतीय-धनुष्क्रीडकः श्याम्-सुन्दर्-स्वामी बैंङ्काक-नगरे विश्व-धनुष्क्रीडायां पैरा-श्रृङ्खलायां पुरुषाणां कम्पौण्ड्-व्यक्तिगत-स्पर्धायां कांस्यपदकं विजितवान्।

।। इति वार्ता: ।।